गङ्गा। यथा, काशीखण्डे। २९। ५३।
"गुणनीयचरित्रा च गायत्री गिरिशप्रिया॥")
त्रिपदा देवी। इति मेदिनी। रे। १५०॥ सा तु त्रिपादष्टाक्षरच्छन्दोयुक्तमन्त्रात्मिका वेदमाता द्विजैरुपास्या। (यथाह मनुः। २। ७७—७८।
"त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः॥
एतदक्षरमेकाञ्च जपन् व्याहृतिपूर्व्विकाम्।
सन्ध्ययोर्व्वेदविद्विप्रो वेदपुण्येन युज्यते॥"
इयमेव सव्याहृतिका ब्रह्मपदप्राप्तिद्वाररूपं तस्मात् प्रत्यहं ब्राह्मणैर्व्याहृतिपूर्व्विकेयं अध्ययनीया। यदुक्तं तत्रैव। २। ८१—८३।
"ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्॥
योऽधीतेऽहन्यहन्येतांस्त्रीणि वर्षाण्यतन्द्रितः।
स ब्रह्म परमभ्येति वायुभूतः खमूर्त्तिमान्॥
एकाक्षरं परं ब्रह्म प्राणायामाः परन्तपः।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते॥")
तस्या नामव्युत्पत्तिर्यथा, स्मृतौ।
"गायन्तं त्रायते यस्मात् गायत्री त्वं ततः स्मृता॥"
सापि ब्रह्मणः पत्नी। यथा,—
"अध्वर्य्युणा समाहूता एहि देवि! त्वरान्विता।
उत्पृताश्चाग्नयः सर्व्वे दीक्षाकालमुपागताः॥
सावित्र्युवाच।
लक्ष्मीर्नाद्यापि चायाति सती नैवेह दृश्यते।
इन्द्राणी चापि शक्राणी गच्छती त्विह।
नाहमेकाकिनी यास्ये यावन्नायान्ति ताः स्त्रियः॥
ब्रूहि गत्वा विरिञ्चिन्तं तिष्ठत्विह मुहूर्त्तकम्॥
वदमानां तथाध्वर्य्युस्त्यक्त्वा देवमुपागमत्।
सावित्री व्याकुला देवी प्रसक्ता गृहकर्म्मणि॥
सख्यो नाभ्यागता यावत् तावन्नागमनं मम।
एवमुक्तोऽस्मि वै देव! कालश्चाप्यतिवर्त्तते॥
यच्च योग्यं भवेदत्र तत् कुरुष्व पितामह!।
एवमुक्ते तदा वाक्यं किञ्चित्कोपसमन्वितः॥
पत्नीञ्चान्यां मदर्थन्तु शीघ्रं त्वञ्च समानय।
प्रवर्त्तते यथा यज्ञः कालहीनो न जायते॥
तथा शीघ्रं विधेहि त्वं नारीं काञ्चिदुपानय।
एवमुक्तस्तथा शक्रो गत्वा सर्व्वं धरातलम्॥
स्त्रियो दृष्टास्तु यास्तेन सर्व्वास्तास्तु परिग्रहाः।
आभीरकन्या सुरूपा सुभाषा चारुलोचना॥
ददर्श तां सुचार्व्वङ्गीं कमलायतलोचनाम्।
कासि कस्य कुतश्च त्वमागता सुभ्रु! कथ्यताम्॥
एकाकिनी किमर्थञ्च वीथिमध्येऽवतिष्ठसे।
रूपान्विता च सा कन्या शक्रं प्रोवाच वेपती॥
गोपकन्या अहं वीर! विक्रेतुमिह गोरसम्।
समागता घृतादीनां प्रगृह्णीष्व यथेप्सितम्॥
एवमुक्तस्तदा शक्रो गृहीत्वा तां करे दृढम्।
आनीय तां विशालाक्षीं यत्र ब्रह्मा व्यवस्थितः॥
कमलाक्षीं स्फुरद्वर्णां पुण्डरीकनिभेक्षणाम्।
गान्धर्व्वेण तदा ब्रह्मा गृहीतुं मन आदधे॥
प्रभुत्वमात्मनो दाने गोपकन्याप्यमन्यत।
यदेवं मां सुरूपत्वादिच्छत्यादातुमाग्रहात्॥
नास्ति सीमन्तिनी काचिन्मत्तो धन्यतरा यतः।
अनेनाहं समानीता यस्य दृग्गोचरं गता॥
एवं चिन्तापरा दीना यावत् सा गोपकन्यका।
भवत्येषा महाभागा गायत्री नामतः प्रभो!॥
तावदेव महाविष्णुः प्रोक्तवानिदमुत्तमम्।
अनुग्रहेण देवेश! अस्याः पाणिग्रहं कुरु॥
गान्धर्व्वेण विवाहेन उपयेमे पितामहः॥"*॥
अस्या ध्यानं यथा,—
"श्वेता त्वं श्वेतरूपासि शशाङ्केन समा मता।
बिभ्रती विपुलावूरू कदलीगर्भकोमलौ॥
एणशृङ्गं करे गृह्य पङ्कजञ्च सुनिर्म्मलम्।
वसाना वसने क्षौमे रक्ते चाद्भुतदर्शने॥
शशिरश्मिप्रकाशेन हारेणोरसि राजसे।
दिव्यकुण्डलपूर्णाभ्यां श्रवणाभ्यां विभूषिता॥
चन्द्रमोगणयुक्तेन मुकुटेन विराजसे।
मुकुटेन त्रिग्रन्थेन केशबन्धेन शोभिना॥
भुजगाभोगसदृशौ भुजौ भ्राजयतो दिशः।
स्तनौ ते कठिनौ देवि! वर्त्तुलौ समचूचुकौ॥
जघनेनातिशुभ्रेण त्रिवलीभिश्च संयुता।
विस्तीर्णस्पष्टजघना सुश्रोणी च वरानना॥
चारुरूपोरुयुगला अम्बुजाभरणा तथा।
त्रैलोक्यधारिणी सा त्वं जगतामेव पावनी॥"
अस्या वैदिकतान्त्रिकध्यानद्वयं गुह्यत्वादत्र न लिखितम्॥ *॥ तस्या जपफलं तत्र ब्राह्मणान् प्रति गायत्रीवाक्यम्।
"विशेषात् पुष्करे स्नात्वा मां जप्त्वा वेदमातरम्।
प्रतिग्रहकृतान् दोषान्न प्राप्स्यथ द्विजोत्तमाः!॥
मदीयैः किल जप्यैस्तु तारणाय त्रिभिः कृतैः।
ब्रह्महत्यासमं पापं तत्क्षणादेव नश्यति॥
दशभिर्जन्मजनितं शतेन तु पुरा कृतम्।
त्रियुगन्तु सहस्रेण नात्र कार्य्या विचारणा॥
अष्टाक्षरा स्थिता चाहं जगद्व्याप्तं मया त्विदम्।
माताहं सर्व्ववेदानां पदैः सर्व्वैरलङ्कृता॥
जप्त्वा मां परमां सिद्धिं यास्यन्ति द्विजसत्तमाः!।
प्राधान्यं मम जाप्येन सर्व्वेषां वो भविष्यति॥"*॥
तस्या माहात्म्यादि यथा,—
"उपलभ्य च सावित्रीं नोपतिष्ठेत यो द्विजः।
काले त्रिकालं सप्ताहात् स पतेन्नात्र संशयः॥
गायत्रीमन्त्रतोयाढ्यं दत्तं येनाञ्जलित्रयम्।
काले सावित्रिकेण स्यात्तेन दत्तं जगत्त्रयम्॥
अष्टादशसु विद्यासु मीमांसाऽतिगरीयसी।
ततोऽपि तर्कशास्त्राणि पुराणं तेभ्य एव च॥
ततोऽपि धर्म्मशास्त्राणि तेभ्यो गुर्व्वी श्रुतिर्नृप!।
ततो ह्युपनिषत् श्रेष्ठा गायत्री च ततोऽधिका॥
वाच्यवाचकसम्बन्धो गायत्र्याः सवितुर्द्वयोः।
वाच्योऽसौ सविता साक्षात् गायत्री वाचिका परा॥
तां देवीमुपतिष्ठन्ते ब्राह्मणा ये जितेन्द्रियाः।
सूर्य्यलोकं ते प्रयान्ति क्रमान्मुक्तिञ्च पार्थिव।॥"
इति पद्मपुराणम्॥ *॥

अथ गायत्रीकल्पः।
"जपन् हि पावनीं देवीं गायत्रीं वेदमातरम्।
तपसा भावितो देव्या ब्राह्मणः पूतकिल्बिषः॥
न सीदेत् प्रतिगृह्णन् स त्वपि पृथ्वीं ससागराम्।
द्वे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः॥
यस्तस्य दुष्कृतं नास्ति पूर्व्वतः परतोऽपि वा।
यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः॥
गायत्रीध्यानपूतस्य कलां नार्हति षोड़शीम्।
एवं किल्बिषयुक्तस्तु विनिर्द्दहति पातकम्॥
उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः।
छन्दस्तस्यास्तु गायत्रं गायत्रीत्युच्यते ततः॥
गायन्तं त्रायते यस्मात् गायत्री तु ततः स्मृता
मरीचे! कारणात्तस्मात् गायत्री कीर्त्तिता मया॥
तव बुद्धिमतां श्रेष्ठ! नित्यं सर्व्वेषु कर्म्मसु।
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह॥
जपन्ति ये सदा तेषां न भयं विद्यते क्वचित्।
दशकृत्वः प्रजप्ता सा रात्र्यह्नोर्यत् कृतं लघु॥
तत् पापं प्रणुदत्याशु नात्र कार्य्या विचारणा।
शतं जप्ता तु सा देवी पापौघशमनी स्मृता॥
सहस्रं जप्ता सा देवी महापातकनाशिनी।
लक्षजाप्येन साध्वेवं सप्त जन्मानि पातकम्॥
कोटिजाप्येन विप्रर्षे! यदिच्छति तदाप्नुयात्।
यक्षविद्याधरत्वे वा गान्धर्व्वे दैवतेऽपि वा॥
यत्र यत्र भवेद्वाञ्छा तत्तदाप्नोत्यसंशयम्।
दशसाहस्रजाप्येन निष्कामः पुरुषो यदि॥
विधिना नियतं ध्यायेत् प्राप्नोति परमं पदम्।
यथाकथञ्चिज्जपिता गायत्री पापहारिणी॥
सर्व्वकामप्रदा प्रोक्ता पृथक्कर्म्मसु निष्ठिता॥"*॥
मरीचिरुवाच।
"विधिना केन कर्त्तव्या गायत्री पापनाशिनी।
पवित्रा परमा ह्येषा सर्व्वकल्याणसाधिनी॥
वह्निरुवाच।
सव्याहृतिं सप्रणवां जप्त्वा मासांश्च षोड़श।
अपि भ्रूणहनः पापात् मुच्यन्तेऽहरहःकृतात्॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः।
अहोरात्रकृतात् पापात् मुच्यते नात्र संशयः॥
अन्तर्जले त्रिरावर्त्त्य गायत्रीं प्रयतस्तथा।
मुच्यते पातकैः सर्व्वैर्यदि न ब्रह्महा भवेत्॥
नास्ति सत्यात् परो धर्म्मो नास्ति कृष्णात् समा गतिः।
गायत्र्याश्च समं नास्ति दिवि चेह च पावनम्॥
हुता च वरदा देवी सर्व्वकामफलप्रदा।
गायत्र्याश्च तिलैर्होमः सर्व्वपातकनाशनः॥
शान्तिकामो यवैः कुर्य्यादायुष्कामो घृतेन तु।
कर्म्मान्तसिद्धिकामस्तु कुर्य्यात् सिद्धार्थकैर्नरः॥
ब्रह्मवर्च्चसकामस्तु पयसा च समाचरेत्।
पुत्त्रकामः सदा दध्ना धान्यकामस्तु शालिभिः॥
क्षीरवृक्षसमिद्भिस्तु ग्रहपीड़ोपशान्तये।
धनकामस्तथा बिल्वैः श्रीकामः कमलैस्तथा॥
आरोग्यकामः क्षीराक्तैः कुर्य्यात् दूर्व्वाङ्कुरैः सदा।